International Journal of Sanskrit Research 2020; 6(2): 265-267

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 265-267
© 2020 IJSR
www.anantaajournal.com
Received: 02-01-2020
Accepted: 04-02-2020

**काञ्चनश्रीः एस्**
विशिष्टाचार्य छात्रा, कर्नाटक संस्कृत विश्वविद्यालय, कर्नाटक, भारत |

**Corresponding Author:**
**काञ्चनश्रीः एस्**
विशिष्टाचार्य छात्रा, कर्नाटक संस्कृत विश्वविद्यालय, कर्नाटक, भारत |

# मृच्छकटिकनाटके दार्शनिकचिन्तनम्

**काञ्चनश्रीः एस्**

## प्रस्तावनम्

भारतीय संस्कृत वाङ्मये ऋतुंभराप्रज्ञावद्भिः ऋषिभिः दृष्टानां अपौरुषेयाणां वेदानां स्थानं अत्यन्तं उत्कृष्टं महत्वं च स्थानं वर्तते ।यतोऽहि ते एव वेदः मूलस्रोतांसि वङ्मयस्यास्य । तैः वेदैः मानवस्य जीवनसाफल्याय उपायाः निर्दिष्टाः । तर्हि मानवस्य जीवनफलं किम् इत्युक्ते परमपुरुषार्थप्राप्तिः।तस्यप्राप्तये यत्नः कर्तव्यः इति वेदानां सन्देशः उपनिषदां च प्रपृत्तिः। तेषां तत्वानां सारल्येन प्रतिपादनाय तदुक्त तत्वानां स्वजीवने अनुष्ठाय जीवनसाफल्यं विन्देयुः इति दर्शनानां, शास्त्राणां, काव्यादीनां च आविष्कारः कृतः अस्मत्पूर्वजैः। तेषु साहित्यशास्त्रं जीवनतत्वप्रसारणकार्ये मुख्यं स्थानं आवहति। तत्र नाटकमन्यतमम्।

पूर्वं कृतयुगस्यान्ते अधर्मस्याधिक्यात् सर्वेदेवाः खेदाः दुःखतप्ताः स्भवन्। ते मनोरञ्जनार्थं ब्रम्हणः समीपं गत्वा अवदन्। - “क्रीडनीयकमिच्छामो दृष्यं श्रव्यं च यद्भवेत्।” इति ।तदा पितामहः ब्रम्हा - “जग्राह्यपाठ्यं ऋग्वेदात् सामभो सङ्गीतमेव च। यजुर्वेदात् अभिनयान् रसान् अथर्वणादपि”॥ इति उक्तरीत्या वेदेभ्यः नाट्यशास्त्रं आविष्कृतवान् ।अनेन इदं ज्ञायते यत् नाट्यं चतुर्वेदसारभूतमिति। अतः अस्यऽपि शास्त्रस्य वेदतत्वप्रसारत्वं वर्तते एव। तदुक्तं भरतेन स्वीये नाट्यशास्त्रे “नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनं” इति । अर्थात् नाट्यम् इति न केवलं अभिनयः किन्तु तदेकम् आराधनम् इति। तेन आराधनेन अभिनेतारः तदास्वादकाश्च भवबन्धनं विस्मृत्य आनन्दे लीनाः अर्थात् अंशतः ब्रम्हानन्दे लीनाः भवन्तीति । न केवलं आनन्दः किन्तु तेन जीवनमौल्यानि अपि ज्ञायन्ते इत्यतः जीवनं धर्मपरताया यापयन्ति येन अन्ते परमपदं प्राप्नुवन्तीति । एवञ्च सर्वतः अपि अस्य शास्त्रस्य आत्यन्तिकसुखप्राप्तिः एव लक्ष्यमिति सिद्धं भवति । नाट्यस्यास्य एकोभागः नाटकं। नाटकानि बहूनि रचितानि कालिदासप्रभृतुभिः कविभिः। तत्र नाटकेषु कथं दार्शनिकविचाराः प्रतिपादिताः इति विषयः प्रसूयते।

**विषयप्रस्तावः**

तेषु बहुषु नाटकेषु अत्यन्तं प्रसिद्धं नाटकं शूद्रकविर्चितं **"मृच्छकटिकं"** इति अस्मिन् नाट्के कथं दार्शनिकविचाराः प्रतिपादिताः इति किञ्चित् विचारयामः । प्रथमम्'दार्शनिक चिन्तनम्' इति पदस्य विचारं कुर्मः। अस्माकं भारते प्रमुखतया षट् दर्शनानि सन्ति। सर्वेश्वपि दर्शनेषु परमपुरुषार्थः कथं प्राप्तव्यः**?**,परम पुरुषार्थस्य स्वरूपं किं **?** इत्यादि प्रमुखतया चिन्त्यते। तत्र दार्शनिकाः परमपुरुषार्थं अनेकधा व्याख्यान्ति। केचन मोक्षः इति, स्वर्गः इति, प्रकृतिरिति इत्यादि। आङ्ग्ल भाषायम् एतस्य अर्थः **'Phylosophical Thoughts'** इति भवति। **'Phylosophy'** इति पदं 'ग्रीक्' भाषात् आगतम्। **Philosophos** इत्युक्ते **'Lover of wisdom'.** अतः **'Phylosophical Thoughts'** इत्युक्ते पाश्चात्यानं चिन्तनम् एवमस्ति। **"Thinking of general and fundamental problems concerning matters such as existence, knowledge, values, reason, mind and language etc."** किन्तु अस्माकं दार्शनिकानां चिन्तनं तु पारमार्थिकज्ञानज्ञानमेवज्ञानमिति। तदुक्तम् अमरसिम्हेन **"मोक्षेधीः ज्ञानम् अन्यत्र विज्ञानं शिल्पशास्त्रयोः"** इति।

"न तत् ज्ञानं न तत् शिल्पं न सा विद्या न सा कला ।
ना सौ योगो न तत् कर्म नाट्येस्मिन् यन्नदृश्यते" ॥(नाट्यशास्त्रम्) [1]

**इति भरतमुनि वचनात् नाट्येष्वपि चतुर्विध पुरुषार्थानाम् उल्लेखः वर्तते इति ज्ञायते। साहित्यदर्पणकारेणापि श्कोकेन अनेन प्रतिपादितम्।**

चतुर्वर्गफलप्राप्तिःसुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥ (साहित्यदर्पणम्.१.२) [2]

चतुर्वर्ग फलप्राप्तिः काव्यतो 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' इत्यादिः कृत्याकृत्यप्रवृत्तिनिवृत्युपदेशद्वारेण ज्ञायते। एतदृश चिन्तनं सर्वेश्वपि नाटकेशु द्रष्टुं शक्यते।
अधुना प्रस्तुतनाट्के कुत्र कुत्र दार्शनिकचिन्तनं प्रतिपादितमिति विचारयामः। अस्मिन् दार्शनिक विचाराः बहवो दृश्यन्ते। तदत्र किञ्चित् प्रस्तूयते।

पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो-
रन्तःप्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य ।
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्वदृष्ट्या
शंभोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥ (मृच्छकतिक -१-१) [3]

प्रथमं अत्र नान्दी श्लोकः उदाहृतः। अत्र तृतीयपादे एवमन्वयः भवति। "तत्वदृष्ट्या व्यपगतकरणम् आत्मानं आत्मनि पश्यतः" इति । आत्मनि आत्मानं पश्यतः इत्यत्र 'आत्मनि' इति शब्दः सप्तमी विभक्तौ तथैव 'आत्मानं'इति शब्दः तृतीयाविभक्तौ च प्रयुक्तः। अधिकरण कारके प्रयुक्तम् आत्मशब्दः जीवपरः तथा कर्म कारके प्रयुक्तः आत्मशब्दः परमात्मपरः इति अवगन्तव्यम्। एवञ्च जीवात्मनि परमात्मानं तत्वदृष्ट्या पश्यतः इत्यर्थः सिद्धो भवति ।तत्र प्रामाणिकम् उपनिषद्वाक्यम् एवमस्ति,"अनेन जीवेन आत्मना अनुपरविष्य नामरूपे व्याकरवाणि" [4] (छां.उ.६.३.२.) इति । अतः जीवात्मा एव परमात्मा इति तत्वदृष्ट्या अस्माभिः ज्ञातव्यम्।तत्वदृष्टिरेव ज्ञानम् ।

चिरं खलु भविश्यामि परलोके पिपासितः
अत्यल्पमिदमस्माकं निवापोदकभोजनं ॥ (मृच्छकटिक - १०-१७) [5]

'चिरं खलु भविश्यामि परलोके' अनेन वाक्येन ज्ञायते यत् चिरम् इत्यस्य नित्यम् इत्यर्थः। नित्यत्वं च उत्पत्ति विनाश शून्यत्वम् । अतः परलोकः इत्यस्य परमपुरुषार्थः इति "न स पुनरावर्तते" [6] (छा.उ.८.१५.१) इति शृत्या ये आत्यन्तिकं परमपुरुषार्थं प्राप्नुवन्ति ते नित्येन शाश्वतं स्थानं प्राप्नुवन्ति इत्यर्थः। एवं च परलोके नित्यं भविष्यन्ति इत्यनेन परलोकप्राप्तौ नित्यं स्थानम् प्राप्नुवन्ति इत्येकः विषयः। अपरः परलोकः इति स्थानं नित्यस्थानम् इत्यपि अवगम्यते एवञ्च विषयद्वयम् अत्र प्रतिपादितं भवति।
'अत्यल्पमिदमस्माकम्' इत्यनेन शब्देन इदं जगत् अथवा इदं जन्म बहु अल्पमिति ज्ञातुं शक्नुमः । अत्यल्पमित्यस्य अनित्यत्वम् इत्यर्थः। अनित्यम् इत्यनेन इदम् उत्पत्ति विनाश शून्य रहितम्। अर्थात् अस्य जगतः उत्पत्तिरपि अस्ति विनाशोऽपि वर्तते इत्यतः इदम् अत्यल्पम् अथवा क्षणिकम् इति ज्ञायते। इदमेव वेदान्तिभिः प्रतिपादितम्। "ब्रम्हैव नित्यं वस्तु, ततः अन्यदखिलम् अनित्यम्" इति। ततः ब्रह्मणः अन्यत् अथवा परमपुरुषार्थस्य अन्यत् यद् यद् वर्तते तत् सर्वमपि अनित्यम् इति वेदान्तिभिः प्रतिपादितम्।

इदमेव अत्यल्पमिदमस्माकम् इत्यनेन पदेन अस्माभिरवगन्तव्यम्।
अत्र एकस्मिन् प्रसङ्गे चाण्डालः चारुदत्तं वध्यस्थानं नीत्वा अपृच्छत्। किं भीतोसि ? इति। चारुदत्तः "न भीतो मरणादस्मि केवलं दूषितं यशः" इत्यवदत्। चाण्डालः- "आर्य चारुदत्त गगनतले प्रति वसन्तौ चन्द्रसूर्याविपि विपत्तिं लभेते। किं पुनर्जना मरणभीरुका मानता वा । लोके कोप्युत्थितः पतति कोपि पतितोप्युत्तिष्ठते....इत्युक्त्वा श्लोकमिमं ब्रुवते-

उत्तिष्ठत्पततो वसनपातिका शवस्य पुनरस्ति ।
एतानि हृदये कृत्वा संधारयमात्मानम् ॥ (मृच्छकतिक - १०-३६) [7] इति ।

**अस्य आशयः एवं वर्तते, जगति कश्चन जन्म लभते चेत् तस्य कर्मवशात् कदाचित् सुखं दुःखं, मरणं, पुनः जन्म प्राप्नोत्येव इति सर्वैःअवगन्तव्यमिति इदमेव भगवद्गीतायां श्रीकृष्णेन भीताय अर्जुनाय एवं उपदिष्टम् ।**

जातस्य हि धृवं मृत्युः धृवं जन्म मृतस्य च ।
तस्मादपरिहार्ये अर्थे न त्वं शोचितुमर्हसि ॥ (भगवद्गीता.२.२७) [8] इति ।

**अर्थात् लब्दजन्मनः धृवं अभ्यधिकारीमृत्युः। मृतस्यच जन्म धृवं । तस्मात् अपरिहार्ये अर्थे न त्वं शोचितुमर्हति इति। अयमेव आशयः उपरितन "उत्तिष्ठत्....."इत्यस्मिन् श्लोकेऽपि प्रकाशितः।**
**एवम् समग्रेस्मिन्नाटके दार्शनिक चिन्तनं बहुत्र दृश्यन्ते। किन्तु अस्मिन् प्रबन्धे केचन विषयाः उदाहरण रूपेण मया प्रदर्षितः । एतादृशीं दृष्टिमावहन्तः नाटकानां अध्ययनं यदि कुर्मः तर्हि नाटकानां यतार्थं फलं प्राप्य जीवनसाफल्यं विन्दामः इत्युक्त्वा विस्तराद्विरम्यते ।**

**आकरग्रन्थाः**


1. मृच्छकटिकम्
2. नाट्यशास्त्रम्
3. साहित्यदर्पणम्.
4. च्छान्दोग्योपनिषत्
5. भगवद्गीता.
6. छा.उ.८.१५.१
7. मृच्छकटिकम् -१०-३६
8. भगवद्गीता.२.२७